# govindAShTakam by Swami Brahmananda

# ગોવિન્દાષ્ટકં સ્વામિબ્રહ્માનન્દકૃતમ્

## Document Information

Text title : govindAShTakam svAmibrahmAnandakRitam

File name : govindAShTakambrahmAnanda.itx

Category : aShTaka, vishhnu, krishna, vishnu, brahmAnanda

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada and Proofread by ksr ramachandran ramachandran_ksr at yahoo.ca

Description-comments : BrihatstotraratnAkara

Latest update : November 24, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગોવિન્દાષ્ટકં સ્વામિબ્રહ્માનન્દકૃતમ્

શ્રી ગણેશાય નમઃ ॥
ચિદાનન્દાકારં શ્રુતિસરસસારં સમરસં
નિરાધારાધારં ભવજલધિપારં પરગુણમ્ ।
રમાગ્રીવાહારં વ્રજવનવિહારં હરનુતં
સદા તં ગોવિન્દં પરમસુખકન્દં ભજત રે ॥ ૧॥

મહામ્ભોદિસ્થાનં સ્થિરચરનિદાનં દિવિજપં
સુધાધારાપાનં વિહગપતિયાનં યમરતમ્ ।
મનોજ્ઞં સુજ્ઞાનં મુનિજનનિધાનં ધ્રુવપદમ્
સદા તં ગોવિન્દં પરમસુખકન્દં ભજત રે ॥ ૨॥

ધિયા ધીરૈર્ધ્યેયં શ્રવણપુટપેયં યતિવરૈઃ
મહાવાક્યૈર્જ્ઞેયં ત્રિભુવનવિધેયં વિધિપરમ્ ।
મનોમાનામેયં સપદિ હૃદિ નેયં નવતનું
સદા તં ગોવિન્દં પરમસુખકન્દં ભજત રે ॥ ૩॥

મહામાયાજાલં વિમલવનમાલં મલહરં
સુબાલં ગોપાલં નિહતશિશુપાલં શશિમુખમ્ ।
કલાતીતં કાલં ગતિહતમરાલં મુરરિપું
સદા તં ગોવિન્દં પરમસુખકન્દં ભજત રે ॥ ૪॥

નભોબિમ્બસ્ફીતં નિગમગણગીતં સમગતિં
સુરૌઘે સમ્પ્રીતં દિતિજવિપરીતં પુરિશયમ્ ।
ગિરાં પન્થાતીતં સ્વદિતનવનીતં નયકરં
સદા તં ગોવિન્દં પરમસુખકન્દં ભજત રે ॥ ૫॥

પરેશં પદ્મેશં શિવકમલજેશમ્ શિવકરં
દ્વિજેશં દેવેશં તનુકુટિલકેશં કલિહરમ્ ।
ખગેશં નાગેશં નિખિલભુવનેશં નગધરં

સદા તં ગોવિન્દં પરમસુખકન્દં ભજત રે ॥ ૬॥

રમાકાન્તં કાન્તં ભવભયલયાન્તં ભવસુખં
દુરાશાન્તં શાન્તં નિખિલહૃદિ ભાન્તં ભુવનપમ્ ।
વિવાદાન્તં દાન્તં દનુજનિચયાન્તં સુચરિતં
સદા તં ગોવિન્દં પરમસુખકન્દં ભજત રે ॥ ૭॥

જગજ્જ્યેષ્ઠં શ્રેષ્ઠં સુરપતિકનિષ્ઠં ક્રતુપતિં
બલિષ્ઠં ભૂયિષ્ઠં ત્રિભુવનવરિષ્ઠં વરવહમ્ ।
સ્વનિષ્ઠં ધાર્મિષ્ઠં ગુરુગુણગરિષ્ઠં ગુરુવરં
સદા તં ગોવિન્દં પરમસુખકન્દં ભજત રે ॥ ૮॥

ગદાપાણેરેતદ્દુરિતદલનં દુઃખશમનં
વિશુદ્ધાત્મા સ્તોત્રં પઠતિ મનુજો યસ્તુ સતતમ્ ।
સ ભુક્ત્વા ભોગૌઘં ચિરમિહ તતોऽપાસ્તવૃજિનો
વરં વિષ્ણોઃ સ્થાનં વ્રજતિ ખલુ વૈકુણ્ઠભુવનમ્ ॥

॥ ઇતિ શ્રી પરમહંસ સ્વામિ બ્રહ્માનન્દ વિરચિતં
શ્રી ગોવિન્દાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by YV Malleswara Rao malleswararaoy@yahoo.com
Proofread by ksr ramachandran ramachandran_ksr at yahoo.ca

*govindAShTakam by Swami Brahmananda*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*